अष्टमः पाठः

# वसुधैव कुटुम्बकम्

## ( अव्यय-प्रयोग )

[आज विश्व अशान्ति के सागर में वर्तमान है । सर्वत्र असंतोष, महत्त्वाकांक्षा, ईर्ष्या, पक्षपात इत्यादि के कारण संघर्ष के बादल छाये हुए हैं । ऐसी स्थिति में प्राचीन भारत की ओर सभी की दृष्टि जाती है जहाँ सम्पूर्ण पृथ्वी को अपना परिवार समझा जाता था । भारत ने विभिन्न विदेशी जातियों का स्वागत किया तथा उन्हें भारतीय बनाया । विश्व को अशान्ति से मुक्त करने के लिए आज उसी उद्घोष की आवश्यकता है कि पूरी पृथ्वी परिवार के समान मान्य तथा पालनीय है। मानवता के इसी संदेश को प्रस्तुत पाठ में प्रकट किया गया है ।]





अधुना सम्पूर्णः संसारः अशान्तो वर्तते । देशः देशं प्रति, समाजः समाजं प्रति, मानवश्च मानवं प्रति द्वेषग्रस्ताः सन्ति। अस्य कारणमपि वर्तते । स्वार्थसिद्धिः, स्वस्य सुखस्य कामना, महत्त्वाकांक्षा च परस्य शोषणाय कमपि प्रेरयति । सर्वे स्वसुखं वाञ्छन्ति, न कश्चित् परस्य सुखम् उत्कर्षं वा सहते । तेन अशान्तिः भवति । तद् दुःखकारणम् ।

अशान्तः मानवः राक्षसः इव भवति । यदि स देववत् भवेत् तदा संसारः शान्तः प्रसन्नः आनन्दमयश्च भविष्यति । तदा शस्त्रादीनां न आवश्यकता । एकः अपरं दृष्ट्वा प्रमुदितः भवेत् । यथा आत्मनः बन्धुं परिवारं वा मन्यते मनुष्यः तथैव अपरमपि जनं बन्धुं परिवारं मन्येत । सर्वे एकरूपाः एकस्य ईश्वरस्य सन्तानाः कथं भिन्नाः सन्ति? यः सर्वेषु जनेषु आत्मभावनां धारयति स वस्तुतः देवः । अस्माकं लक्ष्यं तदेव भवेत् यत् सर्वे वयं परस्परं मित्ररूपाः बन्धुरूपाश्च भवेम । तदा मोहः द्वेषः शत्रुभावना च न भवेत् ।



Scanned with CamScanner

अद्य वैज्ञानिकस्य विकासस्य परिणामः वर्तते यत् संसारः अल्पीकृतः । अद्य एकस्मिन् देशे घटिता घटना सम्पूर्णं संसारं शीघ्रमेव प्रभावयति । वैश्वीकरणस्य प्रभावात् एकः उत्पादः शीघ्रं सर्वेषु देशेषु गच्छति । अतः अद्य विश्वबन्धुत्वं प्रभूतम् आवश्यकमस्ति । उत्सवेषु समारोहेषु परस्परं मिलन्तः जनाः बन्धुत्वं दर्शयन्ति । तथैव राष्ट्रियेषु समारोहेषु विश्वसमारोहेषु च अद्यापि बन्धुत्वं वर्धते । अस्माकं शास्त्रेषु कथ्यते - यत्र विश्वं भवत्येकनीडम् । अर्थात् यथा एकस्मिन् नीडे पक्षिणां परिवारो निवसति तथैव क्वचित् समारोहे, शिक्षास्थले, कार्यस्थले वा सर्वे एकनीडाः भवन्ति । यथा तत्र बन्धुत्वं वर्तते तथैव सामान्यजीवनेऽपि देशानां समाजानां वर्गाणां च मध्ये तदेव एकनीडत्वं बन्धुत्वं च भवेताम् । तत्र स्वार्थः सर्वथा नश्यति, परमार्थः वर्धते । स्वदेशः परदेशश्च परमार्थतः एक एव । इदमेव उदारस्य जनस्य लक्षणमस्ति यत् स स्वस्य परस्य च विचारं न कुर्यात्। तथा च हितोपदेशः -

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥

## शब्दार्थः

| | | |
|---|---|---|
| अधुना | = | आजकल |
| अशान्तः | = | जो शान्त न हो, बेचैन |
| प्रति | = | (की) ओर |
| द्वेषग्रस्तः | = | ईर्ष्या से युक्त |
| महत्त्वाकांक्षा | = | ऊँची इच्छा (ambition) |
| स्वार्थसिद्धिः | = | अपने हितों की सिद्धि |
| स्वस्य | = | अपने का |
| कामना | = | इच्छा |
| परस्य | = | दूसरे का |
| शोषणाय | = | शोषण के लिए / कष्ट देने के लिए |



Scanned with CamScanner

| | | |
|---|---|---|
| **कमपि** | = | किसी को भी |
| **प्रेरयति** | = | प्रेरणा देता है |
| **वाञ्छन्ति** | = | चाहते / चाहती हैं |
| **कश्चित्** | = | कोई |
| **उत्कर्षम्** | = | ऊँचाई (को) |
| **राक्षसः** | = | दैत्य |
| **सहते** | = | सहन करता / करती है |
| **शस्त्रादीनाम्** | = | शस्त्र (पकड़कर चलाये जाने वाले हथियार) आदि का |
| **दृष्ट्वा** | = | देखकर |
| **प्रमुदितः** | = | प्रसन्न, आनन्दित, खुश |
| **मन्यते** | = | माना जाता है |
| **एकरूपाः** | = | समान, एक जैसा |
| **सन्तानाः** | = | संतान (बहुवचन) |
| **आत्मभावनाम्** | = | अपनी जैसी भावना (को) |
| **धारयति** | = | धारण करते हैं, रखते हैं |
| **वस्तुतः** | = | सचमुच |
| **परस्परम्** | = | आपस में |
| **भवेम** | = | (हम) हों |
| **मोहः** | = | लगाव |
| **द्वेषः** | = | ईर्ष्या, जलन |
| **शत्रुभावना** | = | दुष्टता की भावना |



Scanned with CamScanner

| | | |
|---|---|---|
| **अल्पीकृतः** | = | छोटा हो गया (है) |
| **एकस्मिन्** | = | एक में |
| **घटिता** | = | घटी हुई |
| **शीघ्रमेव ( शीघ्रम्+एव )** | = | जल्द ही |
| **प्रभावयति** | = | प्रभावित करता है, असर डालता है |
| **वैश्वीकरणस्य** | = | वैश्वीकरण का (विश्व के देशों का आर्थिक, वैज्ञानिक आदि आधारों पर जुड़ना = वैश्वीकरण) |
| **प्रभावात्** | = | प्रभाव से |
| **उत्पादः** | = | उत्पन्न वस्तु |
| **विश्वबन्धुत्वम्** | = | वैश्विक (संसार भर में) भाईचारा |
| **प्रभूतम्** | = | बहुत अधिक |
| **भवत्येकनीडम् ( भवति+एकनीडम् )** | = | एक घोसले का निवासी होता / होती है |
| **कार्यस्थले** | = | कार्य की जगह में / पर |
| **एकनीडाः** | = | एक घोसले में रहने वाले |
| **स्वार्थः** | = | अपना हित |
| **नश्यति** | = | नष्ट होता है, लुप्त या अदृश्य होता है |
| **परमार्थः** | = | सर्वोच्च लक्ष्य |
| **वर्धते** | = | बढ़ता है |
| **स्वदेशः** | = | अपना देश, राष्ट्र |
| **परदेशः** | = | दूसरे का देश |
| **उदारस्य** | = | उदार, बड़े दिल वाले का |



Scanned with CamScanner

| | | |
|---|---|---|
| लक्षणमस्ति (लक्षणम्+अस्ति) | = | लक्षण / पहचान / चिह्न है |
| कुर्यात् | = | करना चाहिए |
| अयम् | = | यह |
| निजः | = | अपना |
| परो (परः) | = | पराया |
| वेति (वा+इति) | = | अथवा ऐसा |
| गणना | = | गिनती |
| लघुचेतसाम् | = | तुच्छ / निम्न विचार वाले लोगों का |
| उदारचरितानाम् | = | व्यापक विचार वालों का/की |
| वसुधैव (वसुधा+एव) | = | धरती / पृथ्वी ही |
| कुटुम्बकम् | = | परिवार, संबंधी |

## व्याकरणम्

### सन्धि-विच्छेदः

| | | |
|---|---|---|
| मानवश्च | = | मानवः + च (विसर्गसन्धिः) |
| महत्त्वाकांक्षा | = | महत्त्व + आकांक्षा (दीर्घसन्धिः) |
| आनन्दमयश्च | = | आनन्दमयः + च (विसर्गसन्धिः) |
| तथैव | = | तथा + एव (वृद्धिसन्धिः) |
| बन्धुरूपाश्च | = | बन्धुरूपाः + च (विसर्गसन्धिः) |
| अद्यापि | = | अद्य + अपि (दीर्घसन्धिः) |
| भवत्येकनीडम् | = | भवति + एकनीडम् (यण्सन्धिः) |
| जीवनेऽपि | = | जीवने + अपि (पूर्वरूपसन्धिः) |



Scanned with CamScanner

| | | |
|---|---|---|
| हितोपदेशः | = | हित + उपदेशः (गुणसन्धिः) |
| वेति | = | वा + इति (गुणसन्धिः) |
| वसुधैव | = | वसुधा + एव (वृद्धिसन्धिः) |

## प्रकृति-प्रत्यय-विभागः

| | | |
|---|---|---|
| वर्तते | = | √वृत्, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| अस्ति | = | √अस्, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| प्रेरयति | = | प्र + √ईर्=गति , णिच्, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| सहते | = | √सह् , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| भवति | = | √भू , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| भवेत् | = | √भू विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| प्रभावयति | = | प्र + √भू + णिच्, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| गच्छति | = | √गम् , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| प्रभूतम् | = | प्र + √भू + क्त, नपुंसकलिङ्गम्, एकवचनम् |
| दर्शयन्ति | = | √दृश्, + णिच्, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| वर्धते | = | √वृध् , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| कथ्यते | = | √कथ् + यक् (कर्मवाच्यम्), लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| निवसति | = | नि + √वस् , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| नश्यति | = | √नश् , लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| कुर्यात् | = | √कृ , विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |



Scanned with CamScanner

## अभ्यासः

### मौखिकः

1. **अधोलिखितानां पदानाम् उच्चारणं कुरुत -**

अशान्तः, मानवश्च, द्वेषग्रस्तः, स्वार्थसिद्धिः, महत्त्वाकांक्षा, शोषणाय, वाञ्छन्ति, कश्चित्, उत्कर्षम्, दुःखकारणम्, प्रसन्नः, आनन्दमयश्च, शस्त्रादीनाम्, दृष्ट्वा, प्रमुदितः, तथैव, आत्मभावनाम्, मित्ररूपाः, बन्धुरूपाश्च, शत्रुभावना, वैज्ञानिकस्य, अल्पीकृतः, एकस्मिन्, प्रभावयति, वैश्वीकरणम्, विश्वसमारोहेषु, भवत्येकनीडम्, शिक्षास्थले, लक्षणमस्ति, हितोपदेशः, लघुचेतसाम्, उदारचरितानाम्, वसुधैव, कुटुम्बकम् ।

2. **निम्नलिखितानां पदानाम् अर्थं वदत -**

अधुना, द्वेषग्रस्तः, स्वार्थसिद्धिः, प्रेरयति, वाञ्छन्ति, शस्त्रम्, वस्तुतः, परस्परम्, द्वेषः, वैश्वीकरणम्, विश्वबन्धुत्वम्, एकनीडाः, लघुचेतसाम्, उदारचरितानाम्, कुटुम्बकम् ।

3. **इमानि पदानि पठत -**

| | | |
|---|---|---|
| भवति | भवतः | भवन्ति |
| भवसि | भवथः | भवथ |
| भवामि | भवावः | भवामः |

### लिखितः

4. **अधोलिखितानि पदानि लिखत -**

द्वेषग्रस्तः, स्वार्थसिद्धिः, महत्त्वाकांक्षा, वाञ्छन्ति, दुःखकारणम्, भवत्येकनीडम्, लघुचेतसाम्, उदारचरितानाम्, कुटुम्बकम् ।

5. **निम्नलिखितानां पदानां सन्धिं सन्धिविच्छेदं वा कुरुत -**

(क) मानवश्च =



Scanned with CamScanner

(ख) महत्त्व+आकांक्षा =

(ग) तथा+एव =

(घ) अद्यापि =

(ङ) भवति+एकनीडम् =

(च) हित+उपदेशः =

(छ) वसुधा+एव =

6. कोष्ठात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत -

(क) साम्प्रतं सम्पूर्णः संसारः .................................. वर्तते । (शान्तः, अशान्तः)

(ख) अशान्तः मानवः .................................. इव भवति । (देवः, दानवः)

(ग) वयं परस्परं .................................. भवेम । (मित्ररूपाः, शत्रुरूपाः)

(घ) अद्य वैज्ञानिकस्य विकासस्य परिणामः वर्तते यत् संसारः .................................. । (अल्पीकृतः, दीर्घीकृतः)

(ङ) यदि मानवः देववत् भवेत् तदा संसारः शान्तः आनन्दमयः .................................. च भविष्यति । (अप्रसन्नः, प्रसन्नः)

(च) समारोहे, शिक्षास्थले कार्यस्थले वा सर्वे .............. भवन्ति । (बहुनीडाः, एकनीडाः)

7. अधोलिखितानां वाक्यानाम् अनुवादं हिन्दीभाषायां कुरुत -

(क) अधुना सम्पूर्णः संसारः अशान्तो वर्तते ।

(ख) सर्वे स्वसुखं वाञ्छन्ति (इच्छन्ति) ।

(ग) शान्तः मानवः देव इव भवति ।

(घ) वयं परस्परं मित्ररूपाः भवेम ।



Scanned with CamScanner

(ङ) अद्य विश्वबन्धुत्वं प्रभूतम् आवश्यकम् अस्ति ।

(च) अयं निजः परो वा इति गणना लघुचेतसाम् ।

(छ) उदारचरितानां तु वसुधैव कुटुम्बकम् ।

**8. उदाहरणानुगुणं प्रथम-मध्यम-उत्तम-पुरुषरूपाणि लिखत -**

| | | | | |
|---|---|---|---|---|
| उदाहरणम् - | 1. | सः | वीरः | अस्ति । |
| प्रथमपुरुषः | 2. | तौ | ................ | ................ । |
| | 3. | ................ | वीरा : | ................ । |
| | 4. | त्वं | ................ | ................ । |
| मध्यमपुरुषः | 5. | ................ | वीरौ | ................ । |
| | 6. | यूयं | ................ | ................ । |
| | 7. | अहं | ................ | ................ । |
| उत्तमपुरुषः | 8. | आवां | ................ | ................ । |
| | 9. | ................ | वीराः | ................ । |

**9. एकवचने परिवर्तयत -**

| | |
|---|---|
| संसाराः | संसारः |
| सर्वे (पुं०) | ............................ |
| तौ | ............................ |
| मित्ररूपाः | ............................ |
| समारोहेषु | ............................ |
| समाजानाम् | ............................ |
| उदारचरितानाम् | ............................ |



Scanned with CamScanner

**10. पाठानुसारं सत्यकथनस्य पुरतः '✓' तथा असत्यकथनस्य पुरतः 'X' इति चिह्नम् अङ्कयत-**

(क) अधुना सम्पूर्णः संसारः शान्तो वर्तते । ( )

(ख) स्वार्थसिद्धिः कमपि शोषणाय प्रेरयति । ( )

(ग) शान्तः मानवः देववत् भवति । ( )

(घ) अद्य विश्वबन्धुत्वं प्रभूतम् आवश्यकम् अस्ति ( )

(ङ) समारोहेषु जनाः बन्धुत्वं दर्शयन्ति । ( )

(च) अयं निजः परो वेति गणना उदारचरितानाम् । ( )

(छ) दुष्टचरितानां तु वसुधैव कुटुम्बकम् । ( )

**11. संस्कृते अनुवादं कुरुत -**

(क) आजकल सम्पूर्ण संसार अशांत है ।

(ख) सैनिक देश (देशं / राष्ट्रं) की रक्षा करते हैं । (रक्ष् = रक्षा करना)

(ग) छात्र बैग में (स्यूते) पुस्तक रखते हैं । (रक्ष् = रखना)

(घ) राधा भात (ओदनं) पकाती है ।

(ङ) बाघ (व्याघ्राः) वन में रहते हैं ।

(च) तुम्हारी बहन (भगिनी) कहाँ पढ़ती है ?

(छ) हिमालय से गंगा निकलती है (निःसरति/निर्गच्छति) ।

## योग्यता-विस्तारः

**वैश्वीकरण** - साधारण शब्दों में वैश्वीकरण / भूमंडलीकरण (Globalisation) का अर्थ है- देश की अर्थव्यवस्था को विश्व की अर्थव्यवस्था के साथ 'एकीकृत' करना । भारतीय संदर्भ में इसका अर्थ है - विदेशी कम्पनियों को भारत की विभिन्न आर्थिक गतिविधियों में निवेश करने की अनुमति देकर अर्थव्यवस्था को विदेशी निवेश (Investment) के लिए खोलना । 'विदेशी



Scanned with CamScanner

विनिमय नियंत्रण अधिनियम' जैसे कानूनों को धीरे-धीरे समाप्त करके बहुराष्ट्रीय निगमों को देश में आने की और निवेश करने की सुविधाएँ प्रदान करना । भारतीय कम्पनियों को विदेशी कम्पनियों के साथ सहयोग करने की अनुमति देना तथा दूसरे देशों में संयुक्त परियोजनाएँ चालू करने के लिए प्रोत्साहित करना।

'वैश्वीकरण' के कारण विश्व के राष्ट्रों के बीच की दूरियाँ कई दृष्टियों से कम हो गयी है। यथा- आर्थिक, राजनीतिक, वैज्ञानिक, सांस्कृतिक, सामाजिक इत्यादि । विश्व के किसी एक देश में घटी आर्थिक घटना से विश्व के समस्त राष्ट्र आर्थिक, राजनीतिक, वैज्ञानिक इत्यादि स्तरों पर शीघ्र ही प्रभावित हो जाते हैं । वैश्वीकरण का प्रभाव कुछ वैसा ही प्रतीत होता है जैसे विश्व की सभी नदियाँ परस्पर जुड़ी हों और यदि एक में बाढ़ आ जाए तो लगभग सभी नदियों में जल-स्तर बढ़ने लगेगा ।

*****

सिगरेट में 4 हज़ार रासायनिक तत्व, 200 ज्ञात विष और 60 कैंसर पैदा करने वाले एजेंट होते हैं।



Scanned with CamScanner